स्वरूपसंयोगिग्रथिता श्चौड़ी । अस्वरूपसंयोगिग्रथिता पौण्ड्री । अन्ये तु "स्पर्शादीनामसम्बन्धः सम्बन्धोवापि योमिथः स्फुटादिबन्धसंसिद्ध्यै सेह वृत्तिनिरुच्यते । सौकुमार्य्यमथ प्रौढ़िर्मध्यरत्वञ्च तद्गुणौ । गम्भीरौजस्विनी प्रौढ़ा मधुरा निष्ठुरा तथा । कठोरा कोमला मिश्रा परुषा ललिता मिता। इति द्वादशधा भिन्ना कविभिः परिपठ्यते" इत्याहुः । "यथा चम्पकपुष्पादिस्रगादेर्वर्ण उच्यते वर्णावृत्तिस्तथा वाचां वर्णानुप्रास उच्यते । स तु स्तवकवान् स्थानी गर्भोविवृतसंवृतः । गृहीतमुक्तः क्रमवान् विपर्य्यस्तोऽथ संपुटम् । मिथुनं वेणिका चित्रोविचित्रश्चापि वर्ण्यते"। स्थानेस्थाने वर्णस्तवकस्य विन्यासात् स्तवकवान्। नियतविवक्षितस्थानविशेषे विन्यासशाली स्थानी । आवृत्तौ वर्णान्तरायेण गर्भः । स्थानेस्थाने विकाशसङ्कोचाभ्यां विवृतसंवृतः । चक्रवालवद्दानोपादानाभ्यां गृहीतमुक्तः । क्रमेण द्वित्रवर्णानां संयोगस्वराणामावृत्तिः क्रमवान् । स्वरसंयोगवर्णानां क्रमेणावृत्तिश्च क्रमवान् । विपर्य्ययोपन्यासात् विपर्य्ययः । आद्यवर्णवर्त्तिना स्वरेण सह पादमध्यान्तयोरनुप्रासः संपुटम् । अन्तःपादमुपसंहारोपक्रमयोर्विवक्षितस्वरानुप्रासे मिथुनम् । आ वाक्यसमाप्तेः वर्णानुप्रासनिर्वाहो वेणिका । उक्तलक्षणेभ्योऽन्यश्चित्रः । एकवर्णावृत्तेर्यत्रानुप्रासस्यवर्णान्तरवैचित्र्येण विचित्रः । "समग्रमसमग्रं वा यस्मिन्नावर्त्तते पदम् । पदाश्रयेण स प्रायः पदानुप्रासउच्यते । विसर्गविन्दुसंयोगस्वरस्थानाविवक्षया । अनिर्वाहाय स प्रायो यमकेभ्यो विभिद्यते" "मसृणोदन्तुरः स्निग्धः संपुटं सम्पुटावली । खिन्नः स्तवकवान् स्थानी मिथुनं मिथुनावली । गृहीतमुक्तनामान्यस्ततोऽन्यः पुनरुक्तिमान् । इति द्वादशभेदोऽयं मनीषिभिरिहोच्यते"। असंयुक्त वर्णावृत्तेः पदानुप्रासो मसृणः । संयोगाधिक्ये दन्तुरः । स्वरेण सहावृत्तेः स्निग्धः । पदाव्यवधाने संपुटम् । तेषामावली संपुटावली । रीतेरनिर्वाहात् खिन्नः ॥ वर्णानुप्रासवत् पदानुप्रासोऽपि स्थाने स्थाने निवेशे स्तवकवान् । स्थाननियमात् पदानुप्रासः स्थानी । प्रतिपादं द्वयोर्द्वयोः पदानुप्रासयोः निरन्तरमावृत्ति र्मिथुनं तदावली मिथुनावली । चक्रवालवत् पदानुप्रासो गृहीतमुक्तः पदानां पुनः पुनरावर्त्तने पुनरुक्तिमान् । "स्वभावतश्च गौण्या च वीप्साऽभीक्ष्ण्यादिभिश्च सा । नाम्नां द्विरुक्तिर्वाक्ये तु नामानुप्रास उच्यते" । आदिना निमूलसंभ्रमादि गृह्यते । "अर्थभेदे पदावृत्तिः प्रवृत्त्या भिन्नयाथ वा । स सूरिभिरनुप्रासोलाटीय इति गीयते । सचाव्यवहितो व्यस्तः समस्त उभयःपुनः । उभयं चक्रवालञ्च गर्भश्चेहाभिधीयते" ॥ अनुप्रासः १५ ।

१६ चित्रम् "वर्णस्थानस्वराकारगतिबन्धान् प्रतीह यः । नियमस्तद्बुधैः षोढ़ा चित्रमित्यभिधीयते" ॥ स्वरस्य पृथक् निर्द्देशात् वर्णा अत्र व्यञ्जनानि एकव्यञ्जनद्विवञ्जनत्रिव्यञ्जनादिभेदात् नानाविधः एवमेकद्वित्रादिस्वरचित्रम् । स्थानचित्रम् । निष्कण्ठ्यनिस्तालव्यादिभेदात् सप्तविधम् आकारचित्रम् पद्माद्याकारेण चित्रम्। तत्राष्टदलपद्म चित्रम् "कर्णिकायां न्यसेदेकं द्वे द्वे दिक्षु विदिक्षु च । प्रवेशनिर्गमौ दिक्षु कुर्य्यादष्टदलाम्बुजे" प्रकारान्तरं यथा । "अष्टधा कार्णिकावर्णाः पत्रेष्वष्टौ तथाऽपरे। तेषां सन्धिषु चाप्यष्टावष्टपत्रसरोरुहे" । प्रकारान्तरं यथा । "आकर्णिकं पुनः पर्णपर्णान्तात् पद्मकर्णिके । प्रतिपत्रं व्रजेद्वीमानिह त्वष्टदलाम्बुजे" इति चतुर्द्दलं यथा "कर्णिकातो नयेदूर्द्धं पत्राकाराक्षरावलीम् । प्रवेशयेत् कर्णिकायां पद्ममेतच्चतुर्दलम्"। षोड़शदलं यथा "गोमूत्रिकाक्रमेणास्य वर्णाः सर्व्वे समासतः । मध्ये त्वेकाक्षरन्यासात् पद्मोऽयं षोड़शच्छदः" अष्टपत्रं कविनामाङ्कं यथा "निविष्टाष्टदलन्यासमिदं पादार्द्धभक्तिभिः । अस्पृष्टकर्णिकं कोणैः कविनामाङ्कमम्बुजम् । एतानि चित्राणि अनुष्टुप्छन्दस्येव । चक्रबन्धो यथा "पुरः पुरोलिखेत् पादानत्र त्रीनुत्तरीकृतान् । तुर्य्यन्तु भ्रमयेन्नेमौ नामाङ्कश्चक्रसंविधः" । अस्योद्धारोदर्शितो माघव्याख्यायां मल्लिनाथेन । दशमण्डलरेखात्मके नवमण्डलान्तरालवति चक्रे नाभिस्थानेन सहैकविंशति कोष्ठं प्रत्येकं द्वयक्षरवत् पङ्क्तित्रयं समरेखया लिखित्वा तत्रैकस्यां पङ्क्तौ वामपार्श्वक्रमेण आद्यपादमालिख्य तथा प्रादक्षिण्येन द्वितीयायां तृतीययां च पङ्क्त्यां द्वितीय तृतीयौ पादौ लिखित्वा नेमिस्थाने वाह्यवलये साक्षरकोष्ठषट्केन सहाष्टादशकोष्ठवति तृतीयकोष्ठान्तवर्त्तिवर्णमारभ्य प्रादक्षिण्येन तुर्य्यपादं लिखित्वा तत्रैव समापयेत् । तत्रैव माद्यन्तवर्णैः तुर्य्यपादोद्धारः तन्नेमिस्थाने आद्यपादत्रयदशमाक्षरसंवादः । तृतीयान्तकोष्ठे तुर्य्याद्यन्तवर्णयोः संवादः" यथा "सत्त्वं मानविशिष्टमाजिरभसादालम्ब्य भव्यः पुरो लब्धाधक्षयशुद्धिरुद्धुतरश्रीवत्स भूमिर्मुदा । मुक्त्वा काममपास्तभीः परमृगव्याधः सनादं हरेरेकोघैः समकालमभ्रमुदयी रोपैस्तदा ततस्तरे" । अत्र तृतीयवलये "माघकाव्यमिदम्"। "षष्ठवलये, शिशु-